"वदन्ति विश्वं कवयः स्म नश्वरं
पश्यन्ति चाध्यात्मविदो विपश्चितः ।
तथापि मुह्यन्ति तवाज मायया
सुविस्मितं कृत्यमजं नतोऽस्मि तम् ॥")

नष्टः, त्रि, (नश + क्तः ।) अदर्शनविशिष्टः । तत्पर्य्यायः । तिरोहितः २ । इत्यमरः । २ । ८ । ११२ ॥ (यथा, पञ्चतन्त्रे । १ । ३७८ ।
"नष्टं मृतमतिक्रान्तं नानुशोचन्ति पण्डिताः ।
पण्डितानाञ्च मूर्खाणां विशेषोऽयं यतः स्मृतः ॥"
अधमः । यथा, चाणक्ये । ८० ।
"असन्तुष्टा द्विजा नष्टाः सन्तुष्टा इव पार्थिवाः ।
सलज्जा गणिका नष्टा निर्लज्जास्तु कुलस्त्रियः ॥"
गलितः । यथा, हरिवंशे । १७४ । १२३ ।
"तृतीये तु मुहूर्त्ते सा नष्टा बाणपुरात् तदा ।
सखीप्रियं चिकीर्षन्ती पूजयन्ती तपोधनान् ॥"
पलायितः । यथा, रत्नावल्याम् ।
"नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपाम् ॥"
निष्फलः । यथा, मनुः । ३ । १८० ।
"नष्टं देवलके दत्तं अप्रतिष्ठन्तु वार्द्धुषौ ॥")
नाशाश्रयः । यथा । "योगो नष्टः परन्तप ॥"
इति श्रीभगवद्गीता ॥ नाशे, क्ली ॥

नष्टचन्द्रः, पुं, (नष्टो दुष्टश्चन्द्रः ।) सौरभाद्रस्योभयपक्षे चतुर्थ्यामुदितश्चन्द्रः । यथा,—
"नष्टचन्द्रो न द्रष्टव्यो भाद्रे मासि सितासिते ।
चतुर्थ्यामुदितोऽशुद्धः प्रतिषिद्धो मनीषिभिः ॥
चन्द्रस्तारापहरणं कलङ्कमतिदुष्करम् ।
तस्मै ददाति हे नन्द ! कामतो यदि पश्यति ॥
अकामतो नरो दृष्ट्वा मन्त्रपूतं जलं पिबेत् ।
तदा शुद्धो भवेत् सद्यो निष्कलङ्की महीतले ॥
'सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः ।
सुकुमारक ! मारोदीस्तव ह्येष स्यमन्तकः ॥'
इति मन्त्रेण पूतञ्च जलं साधुः पिबेद्ध्रुवम् ॥
पुरा तारा गुरोः पत्नी नवयौवनसंयुता ।
रत्नभूषणभूषाढ्या रत्नकृत्याम्बरा सती ॥
सुश्रोणी सुस्मिता रम्या सुन्दरी सुमनोहरा ।
अतीवकवरीरम्या मालतीमाल्यभूषिता ॥
सिन्दूरबिन्दुना सार्द्धं चारुचन्दनबिन्दुभिः ।
कस्तूरीबिन्दुनाधश्च भालमध्यस्थलोज्ज्वला ॥
रत्नेन्द्रसारनिर्म्माणकणमञ्जीररञ्जिता ।
सुवक्रलोचना श्यामा सुचारुकज्जलोज्ज्वला ॥
सुचारुचारुमुक्ताभदन्तपङ्क्तिमनोहरा ।
रत्नकुण्डलयुग्मेन चारुगण्डस्थलोज्ज्वला ॥
कामिनीष्वतुला बाला गजेन्द्रमन्दगामिनी ।
सुकोमला चन्द्रमुखी कामाधारा च कामुकी ॥
स्वर्गमन्दाकिनीतीरे स्नाता स्निग्धाम्बरा वरा ।
ध्यायन्ती गुरुपादं सा स्वगृहं गमनोन्मुखी ॥
दृष्ट्वा तस्याश्च सर्वाङ्गमनङ्गबाणपीडितः ।
भाद्रे चतुर्थ्यांश्चन्द्रश्च जहार चेतनं व्रज ! ॥
स्नानं चर्चेन संप्राप्य रथस्थो रसिकी बली ।
रथमारोहयामास करे धृत्वा च तारकाम् ॥
कामोन्मत्तः कामिनीन्तां समाश्लिष्य चुचुम्ब सः ।
शृङ्गारं कर्त्तुमुद्युक्त तमुवाच गुरुप्रिया ॥
तारकोवाच ।
त्यज मां त्यज मां चन्द्र ! सुरेषु कुलपांसक ! ।
गुरुपत्नीं ब्राह्मणीञ्च पतिव्रतपरायणाम् ॥
गुरुपत्नीसङ्गमने ब्रह्महत्याशतं लभेत् ।
पुत्रस्त्वं तव माताहं धैर्य्यं कुरु सुरेश्वर ! ॥
धिक् त्वां श्रुत्वा सुरगुरुर्भस्मीभूतं करिष्यति ।
गुरुपत्नी विप्रपत्नी यदि सा च पतिव्रता ॥
ब्रह्महत्यासहस्रञ्च तस्याः सङ्गमने लभेत् ।
पुत्राधिकश्च शिष्यश्च प्रियो मत्स्वामिनो भवान् ॥
स्वधर्म्मं रक्ष पापिष्ठ ! मामेव मातरं त्यज ।
दास्यामि स्त्रीवधं तुभ्यं यदि मां संग्रहीष्यसि ॥
विलङ्घ्य तारावचनं ताञ्च सम्भोक्तुमुद्यतम् ।
शशाप तारा कोपेन निष्कामा सा पतिव्रता ॥
राहुग्रस्तो घनग्रस्तः पापयुक्तो भवान् भव ।
कलङ्की यक्ष्मणा ग्रस्तो भविष्यसि न संशयः ॥
चन्द्रमेवं तदा तूर्णं कामदेवं शशाप सा ।
तेजस्विना केनचित्त्वं भस्मीभूतो भविष्यसि ॥
चन्द्रस्तारां गृहीत्वा च कृत्वा च रमणं व्रज ! ।
क्रोड़े निधाय प्रययौ रुदन्तीं तां शुचिस्मिताम् ॥
निर्जने निर्जने रम्ये शैले शैले मनोहरे ।
तत्र दृष्ट्वासुरगुरुं बलिगेहात् समागतम् ॥
प्रणम्य सर्व्वमुक्ता च चन्द्रस्तं शरणं ययौ ।
शुक्रस्तं बोधयामास वचनं नीतियुक्तितः ॥
शुक्र उवाच ।
शृणु वत्स ! प्रवक्ष्यामि गुरवे देहि तारकाम् ।
गुरुपत्नीं मातृपरां त्यज मद्वचनाद्विधो ! ॥
कुरु पापक्षयोपायं निवृत्तिस्तु महाफला ।
सतीनां गुरुपत्नीनां ग्रहणेन बलेन च ॥
ब्रह्महत्यासहस्राणां पातकं लभते जनः ।
कुम्भीपाके पच्यते च यावद्वै ब्रह्मणः शतम् ॥
बृहस्पतिश्च तेजस्वी त्वां भस्मीकर्त्तुमीश्वरः ।
न चकार कृपालुश्चेत् प्रियशिष्येण हेतुना ॥
उतथ्यपत्नीं दृष्ट्वा स पुरा रेमे सकामतः ।
तत्पतेः शापतोऽस्यैव परग्रस्ता प्रिया सती ॥"
"एतस्मिन्नन्तरे ब्रह्मा बोधयित्वा कविं विभुः ।
समानीय निशानाथं तारकासहितं व्रज ! ।
शम्भोश्च चरणाम्भोजे चकार च समर्पणम् ॥
शम्भुस्तं प्रीतियुक्तश्च वासयामास वक्षसि ॥
दत्त्वा तस्मै पादरेणुं निष्पापञ्च चकार सः ।
दत्त्वा तन्मस्तके हस्तं कृपालुरभयं ददौ ॥
क्षीरोदे स्थापयित्वा च प्रायश्चित्तेन शङ्करः ।
चकार चन्द्रं निष्पापं ब्रह्मणा सहितः शुचिम् ॥
योगेन चन्द्रं योगीन्द्रो द्विखण्डञ्च चकार सः ।
ररक्षार्द्धं ललाटे च सोऽप्यर्द्धं ब्रह्मणः पुरः ॥
अतएव महादेवो बभूव चन्द्रशेखरः ।
मृगाङ्को लज्जितस्तत्र कलङ्की देवसंसदि ॥
लज्जया च स्वयोगेन देहत्यागञ्चकार सः ।
तच्छरीरञ्च क्षीरोदे ब्रह्मणा च समर्पितम् ॥
चरोदाश्विश्च कृपया शुभा क्षीरोदधेस्तटे ।
अमेधचूर्णं तस्य पपात च जलौ व्रज ! ॥
भस्माद्बभूव चन्द्रश्च निष्पापो देवसंसदि ।
ब्रह्मा च भगवान् शम्भुरभिषेकञ्चकार तम् ॥
उवाच च महादेवो निर्भयं देवसंसदि ॥
महादेव उवाच ।
स्वस्थानं गच्छ पुत्र ! त्वं कुरु स्वविषयं मुदा ।
पश्चात् श्वशुरशापेन यक्ष्मग्रस्तो भविष्यसि ॥
यथं पतिव्रताशापं कर्त्तुमीशश्च को भुवि ।
ममाशिषा यक्ष्मणश्च प्रतिकारो भविष्यति ॥
यस्माद्भाद्रचतुर्थ्यान्तु गुरुपत्नी हृता कृता ।
तस्मात्तस्मिन्दिने वत्स ! पापदृश्यो युगे युगे ॥
मा भुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपि ।
अवश्यमेव भोक्तव्यं कृतं कर्म्म शुभाशुभम् ॥
देहत्यागेन हे वत्स ! कर्म्मभोगो न नश्यति ।
प्रायश्चित्तान्न सन्देहो ह्यस्तमेव भविष्यति ॥
तारापहरणं वत्स ! कलङ्कश्चन्द्रमण्डले ।
मृगाकृतं विलम्बञ्च भविष्यति युगे युगे ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे । ८०-८१ अः ॥

नष्टचेष्टता, स्त्री, (नष्टा चेष्टा यस्य । तस्य भावः । तल् ।) प्रलयः । इत्यमरः । १ । ७ । ३३ ॥ शोकादिना परिस्पन्दनाशो नष्टचेष्टता तत्र प्रलयः प्रलीयतेऽनेन प्रलयः ली ङ ष ञो श्लिषि अल् । प्रलयः सात्त्विको भावः मूर्च्छेत्यर्थः । इति सर्व्वस्वम् ॥ हर्षशोकादिभिरशेषचेष्टानाशः प्रलय इत्यर्थः । इति भरतः ॥ ईहाशून्यता च ॥

नष्टाग्निः, पुं, (नष्टः प्रमादात् निर्व्वाणमाप्तः अग्निर्यस्य ।) यस्याग्निहोत्रिणः प्रमादादिना कारणान्तरेण वा अग्निर्नष्टो निर्व्वाणः स्यात् सः । तत्पर्य्यायः । वीरहा २ । इत्यमरः । २ । ७ । ५३ ॥

नष्टाभिद्वन्द्वं, क्ली, (नष्टस्य चौरेणापहृतस्य वस्तुन आप्तिः तस्याः चिह्नमिव ।) किञ्चित्प्राप्तचौरनीतद्रव्यम् । तत्पर्य्यायः । लोप्त्रम् २ । इति हारावली । १५८ ॥

नष्टेन्दुकला, स्त्री, (नष्टा इन्दुकला यस्याम् ।) कुहूः । इत्यमरः । १ । ४ । ६ ॥

नसा, स्त्री, (नस् + वा टाप् । यद्वा, नसते कुटिलतां प्रकाशयतीति । नस कौटिल्ये + अच् । टाप् ।) नासिका । इति त्रिकाण्डशेषः ॥

नस्तः, पुं, (नसते कुटिलतां प्रकाशयत्यनेनेति । नस् + क्तः । बाहुलकात् इड़भावः ।) नासिका । इति शब्दमाला ॥ (यथा, महाभारते । ५ । १३१ । १० ।
"नेत्राभ्यां नस्ततश्चैव श्रोत्राभ्याञ्च समन्ततः ।
प्रादुरासन् महारौद्राः सधूमाः पावकार्च्चिषः ॥")
नस्ये, क्ली । इति रत्नमाला ॥ पञ्चविधनस्तकर्म्माणि यथा,—
"प्रतिमर्षोऽवपीड़श्च नस्यं प्रधमनन्तथा ।
शिरोविरेचनश्चैव नस्तकर्म्म तु पञ्चधा ॥
ईषदुच्छ्वसनात् स्नेहो यावान् वक्त्रं प्रपद्यते ।
नस्ते निषिक्तस्तं विद्यात् प्रतिमर्षं प्रमाणतः ॥
प्रतिमर्षश्च नस्यार्थं करोति च न दोषभाक् ।
शोधनः स्तम्भनस्तु स्यादवपीड़ो द्विधा मतः ॥
कल्कपीष्य दीयते यस्मादवपीड़स्ततः स्मृतः ।